**अस्मिन् प्रश्नपत्रपुस्तिकायाम् 28 प्रश्नाः [खण्ड – क (20) + खण्ड – ख (4+4)] एवं 8 पृष्ठाः सन्ति ।**

Sl. No.

Roll No. / अनुक्रमांक | | | | | | | | | | | | |

Code No. / कोड नं. **60/SS/A/S**

Set / सेट **A**

# SANSKRIT

# संस्कृतम्

# (309)

Day and Date of Examination
**(परीक्षादिवसः दिनाङ्कश्च)** ______________________

Signature of Invigilators 1. ______________________
**(निरीक्षकहस्ताक्षरद्वयम्)**
2. ______________________

**सामान्य अनुदेशाः**

1. परीक्षार्थी प्रश्नपत्रपुस्तिकायाः प्रथमपृष्ठे स्व–अनुक्रमाङ्कम् अवश्यं लिखतु ।

2. निरीक्ष्यतां यत् प्रश्नपत्रस्य पृष्ठसंख्या प्रश्नानां संख्या च प्रथमपृष्ठस्य शीर्षे मुद्रितसंख्यानुसारमेव अस्ति । प्रश्नाः क्रमानुसारं सन्ति न वा इत्यपि निरीक्षणीयम् ।

3. उत्तरपुस्तिकायां परिचयचिह्नम् अथवा कुत्रापि निर्दिष्टस्थानेतरस्थलेषु अनुक्रमाङ्क लेखनं सर्वथा वर्जितम् अस्ति ।

4. स्व–उत्तरपुस्तिकायां प्रश्नपत्रस्य कूट(कोड) संख्या **60 /SS/A/S, Set - A** अवश्यमेव लेखनीया ।



collegedunia.com
India's largest Student Review Platform

# SANSKRIT

# संस्कृतम्

# (309)

समय : होरात्रयम्] [पूर्णाङ्का : 100

**निर्देशाः** (i) अस्मिन् प्रश्नपत्रे द्वौ खण्डौ स्तः। खण्डः – क (केन्द्रिक पाठ्यक्रमः), खण्डः – ख (वैकल्पिक– I एवं वैकल्पिक– II) स्तः।

(ii) खण्डः – क अनिवार्यः। अस्मिन् खण्डे 20 प्रश्नाः सन्ति।

(iii) खण्डः – ख एकः एव वैकल्पिकः समाधेयः।

(iv) खण्डः – क कृते 85 अङ्काः, खण्डः – ख संस्कृतं संस्कृतिश्च अथवा प्रयोजनमूलक संस्कृतम् इति वैकल्पिकयोः केवलम् एकः एव वैकल्पिकः समाधेयः। अस्य कृते 15 अङ्काः निर्धारिताः।

## खण्डः – क

## (केन्द्रिकः पाठ्यक्रमः)

**1.** अधोलिखितेषु कस्यचिदेकस्य पाठस्य सारं षड्वाक्येषु लिखत – **[6]**

क) एतद् उपास्यम्

ख) अनन्तः ज्ञानसागरः

ग) पर्यावरणस्य संरक्षणम्

**2.** अधोलिखितं गद्यांशं पठित्वा प्रश्नान् संस्कृतेन उत्तरत – **[4 × 1 = 4]**

अथ पुनः अग्रे एकस्य हस्तात् वर्तिकाअपतत्। सोऽपि प्रहर्षितः यावत् खनति तावत् सुवर्णमयीं भूमिं दृष्ट्वा विस्मयोत्फुल्ल – लोचनः उवाच – भोः गृह्यतां स्वेच्छया सुवर्णम्। किमतिलोभेन। अस्माकं कृते एतत् धनं पर्याप्तम्।

प्रश्ना :

क) सः कीदृशीं भूमिम् अपश्यत्?

ख) सुवर्णमयीं भूमिं दृष्ट्वा सः कीदृशः जातः?

ग) सः स्वेच्छया किं ग्रहीतुम् उवाच?

घ) अतिलोभस्य कः परिणामः भवति?



collegedunia
India's largest Student Review Platform

**3.** अधोलिखितानां प्रश्नानाम् उचितमुत्तरं कोष्ठकात् चित्वा लिखत – **[4 × 1 = 4]**

क) कीदृशानि कर्माणि सेवितव्यानि? (प्रशंसनीयानि/अनवद्यानि)

ख) गुरुजनानांकथं विधानि कर्माणि उपास्यानि? (सुचरितानि/दुश्चरितानि)

ग) अतिलोभा विष्टस्य मस्तके किं भ्रमति? (रुचिरम्/चक्रम्)

घ) कस्मिन् स्थाने स्नानं पुण्यदायकम्? (दक्षिणसमुद्रे/वाणतीर्थे)

**4.** क) रेखाङ्कित पदमाश्रित्य प्रश्न निर्माणं कुरुत – **[2 × 1 = 2]**

i) दक्षिणसमुद्रे <u>एकस्मिन् द्वीपे</u> विवेकानन्द स्मारकः अस्ति ।

ii) <u>विक्रमस्य</u> राज्ये कोऽपिजनः पापकर्म निरतः नासीत् ।

ख) प्रश्नान् उत्तरत – **[2 × 1 = 2]**

i) वैज्ञानिकैः अन्तरिक्षात् कस्याः सौन्दर्यं वर्णितम्?

ii) कः कृत्तां नासिकां पुनः स्थापने निपुणः आसीत्?

**5.** एतत् कथनं कः कम् प्रति कथयति? **[2]**

क) स्वागतम्, अत्र भवताम् । कुतः समायाताः भवन्तः?

ख) प्राप्तोऽस्मि, तिष्ठ, ममवेगमिमं सहस्व ।

**6.** अधोलिखितं पद्यांशद्वयं पठित्वा प्रश्नात् उत्तरत – **[2 + 2 = 4]**

क) अधमाः धन मिच्छन्ति, धनमानं च मध्यमाः ।
उत्तमा मानमिच्छन्ति, मानो हि महतां धनम् ।।

<u>प्रश्नद्वयम्</u> –

i) धनं के इच्छन्ति?

ii) महतां धनम् किम्?

ख) कः कुलकमल दिनेशः सति गुणविभवेऽपि यो नम्रः ।
कस्य वशे जगदेतत् प्रिय हितवचनस्य धर्मनिरतस्य ।।

<u>प्रश्नद्वयम्</u>

i) कुलकमलस्य सूर्यः कः?

ii) एतत् जगत् कस्य वशे अस्ति?



collegedunia
India's largest Student Review Platform

7. अधोलिखितयोः अन्वयद्वयोः रिक्तस्थान पूर्तिं कुरूत – [2]

क) समुद्वहन्तः सलिला तिभारम् बलाकिनो वारिधरा नदन्तः ।
महत्सुश्रृंगेषुमहीधराणां, विश्रम्य विश्रम्य पुनः प्रयान्ति ।।

अन्वयः–

बलाकिनः वारिधराः, सलिलातिभारम्ः समुद्वहन्तः ........
महीधराणां, महत्सु श्रृंगेषु, विश्रम्य, विश्रम्य पुनः ........।

ख) अक्रोधेन जयेत् क्रोधमसाधुं साधुना जयेत् ।
जयेत् कदर्यं दानेन, जयेत् सत्येन चानृतम् ।।

अन्वयः –

क्रोधम् अक्रोधेन जयेत्, असाधुम् ........
जयेत्, कदर्यम् दानेन जयेत्, .......... च सत्येन जयेत् ।

8. अधोलिखित पद्यांशद्वयस्य भावार्थयोः रिक्त स्थानानि पूरयत – [2]

क) तृणानि भूमिरुदकं वाक् चतुर्थी च सूनृता ।

भावार्थः –

सतां गेहेषु आसनस्य, स्थानस्य, जलस्य मधुरवाचः कदापि ........ न भवति ।

ख) पूजितम् ह्यशनं नित्यं बलमूर्जं च यच्छति ।

भावार्थः –

यदिवयं आदरेण रुक्षं शुष्कम् चापि भोजनम् भक्षयेम तद्भोजनम् अस्मभ्यं ............ यच्छति ।

9. पद्यांशं 'अ' स्तंभात् 'ब' स्तम्भेन सह मेलयत – [2]

| स्तम्भ 'अ' | स्तम्भ 'ब' |
|---|---|
| (i) मनः कीदृशम् विद्धि | (क) ममत्वमुच्चैः शिरसां सतीव |
| (ii) आमेखलं सञ्चरतां धनानाम् | (ख) न सा स्नेहेन वर्तते |
| (iii) क्षुद्रेऽपिनूनं शरणं प्रपद्ये | (ग) मनः प्रग्रहमेव च |
| (iv) भिन्ना श्लिष्टा तु या मैत्री | (घ) छायामधः सानुगतां निषेव्य |

10. 'काले फलति सौभाग्यम्' इति नाटकस्य सारांशं षड्वाक्येषु लिखत । सहायतायै बिन्दवः दत्ताः– [6]

| बिन्दवः |
|---|
| राजा, प्रजावत्सलः, राज्ये नासीत्, निर्धनः, लब्धदत्तः विनम्रः सभायाम् आगतवान्, नृपः बीजपूर फलं, एकेन रूप्यकेण, फलं, विक्रीतवान्, साधुः, नृपाय, फलं दत्तवान् पुनः, लब्धदत्तः, फलं प्राप्नोति – पुनः, उदरपूर्त्यै विक्रीतवान् नर्तकी, नृपाय, ददाति, अंते फलरत्नानि तस्मै ददातिः लब्धदत्तः संत्तोषी । |



collegedunia
India's largest Student Review Platform

**11.** अधोलिखितं नाट्यांशद्वयं पठित्वा प्रश्नान् उत्तरत – **[1 + 1 = 2]**

क) विदूषकः – (स्वप्नेजल्पति) – भोवयस्य, सन्धिरिव दृश्यते । चौरमिव पश्यामि । तद्गृहणातु भवान् इदं सुवर्णभाण्डम् ।

शर्विलकः – (दृष्ट्वा) अये, सत्यमेव एतद् सुवर्णभाण्डम् । भवतु गृह्णामि । अथवा न युक्तंतुल्यावस्थं पीडयितुम् । तद् गच्छामि ।

विदूषकः – (निद्रित एव) भोवयस्य, शापितोऽसि यदि एतत् सुवर्णभाण्डं न गृह्णामि ।

शर्विलकः – अनतिक्रमणीया भवतः आज्ञा । तद्गृह्णामि ।

प्रश्नाः –

i) स्वप्नावस्थायां सुवर्णभाण्डं ग्रहीतुं विदूषकः कं कथयति?

ii) विदूषकः स्वप्ने सुवर्णभाण्डं कस्मै प्रदत्तवान्?

ख) संविद्यमानं नास्तीति ब्रूयादस्म द्विधः कथम् ।
न दास्यामीत्यसत्यं वा विस्पष्टमपि याचितः ।।

प्रश्नाः –

i) अस्मद्विधः इति शब्दः राज्ञः कं गुणं प्रकटयति?

ii) याचितः सन् दानशीलः नरः किं करोति?

**[1 + 1 = 2]**

**12.** अधोलिखितं गद्यांशं पद्यांशं च पठित्वा उभयोः प्रदत्त प्रश्नान् उत्तरत –

क) गद्यांशः

भारतम् अस्माकं देशः । वयं सर्वे भारतीयाः भ्रातरः भगिन्यश्च परस्परं स्नेहेन अत्र निवसामः । वयम् आदरेण श्रद्धया च भारतं नमामः । अस्य अन्नेन जलेन च पोषिताः वयं कृतज्ञाः स्मः अत्र अनेकाः नद्यः स्वजलेन अस्य भूमिं सिञ्चन्ति, येन भारतभूमिः शस्यश्यामला वर्तते ।

प्रश्ना : –

i) भारतीयानां परस्परं कः सम्बन्धः? **[2]**

ii) ते भारतं कथं नमन्ति? **[2]**

iii) भारतभूमिः कीदृशी? **[1]**

ख) पद्यांशः

काव्यशास्त्रविनोदेन कालो गच्छति धीमताम् ।
व्यसनेन च मूर्खाणां निद्रया कलहेन वा ।।

प्रश्नाः –

i) धीमताम् कालः कथं गच्छति? **[2]**

ii) मूर्खाः कालं कथं यापयन्ति? **[2]**

iii) अस्य पद्यांशस्य शीर्षकं लिखत? **[1]**



collegedunia.com
India's largest Student Review Platform

13. मञ्जूषापदसहायतया 'विजयादशमी' इति विषयमधिकृत्य दश वाक्यानि संस्कृते लिखत। [1 × 10 = 10]

| मंजूषा |
|---|
| आश्विने मासे उपांसना, नवदिनपर्यन्तं दुर्गापूजा, नवरात्रम् इति कथ्यते दशमे दिवसे विजयोत्सवः, विजयादशमी रामः लंकातः अयोध्यामागत्य विजयपर्वम् कृतवान्, अत एव दिवसः विजयादशमी। |

14. भवान् विजयः। भवताम् विद्यालयस्य पुस्तकालये संस्कृत पुस्तकानाम् अभावः। तदर्थम् अधिकानां पुस्तकानां संग्रहणार्थं प्राचार्यं प्रति पत्रं लिखत। [6]

15. भवत्याः नाम शिखाः। ग्रीष्मावकाशे पर्वतीयप्रदेशं गन्तुम् स्व सख्ये शीलायै संवादात्मकानि चत्वारि वाक्यानि लिखतु। [1 × 4 = 4]

16. रेखाङ्कित पदे संधिच्छेदं कुरूत – [1]

क) मध्ये यस्तस्य तिष्ठति।

ख) पूजितं ह्यशनं नित्यम्।

17. रेखाङ्कित पदे का विभक्तिः किं च मूलपदम्? [2 + 2 = 4]

क) तस्याः भातुः नाम संयोगिता आसीत्।

ख) वातावरणे विभिन्नाः ध्वनयः व्याप्ताः भवन्ति।

18. समुचित पद निर्माणं कृत्वा रिक्तस्थानं पूरयत – [4 × 1 = 4]

क) राज्ञः ............ यक्षाणां हृदय परिवर्तनं भवति। (त्याग + उचित वि.)

ख) सुश्रुतेन शताधिकानि .............. निर्धारितानि। (यन्त्र + उचित वि.)

ग) वायुयानात् ............ सौन्दर्यं दृश्यते। (पृथिवी + उचित विभक्ति)

घ) शार्दूलःकस्य ............ आज्ञां दत्तवान्। (वध + उचित विभक्ति)

19. यथानिर्दिष्टं कुरुत – [4 × 1 = 4]

क) प्रियाविहीनाः शिखिनः प्लवंगाः। (रेखांकितस्य विग्रहं कुरुत)

ख) हिमालयो नाम नगाधिराजः। (रेखांकितस्य विग्रहं कुरुत)

ग) ततः प्रविशति आचार्यः। (एकम् अव्ययं चिनुत)

घ) देवैः परिवृतः। (रेखांकितस्य प्रकृतिप्रत्ययं लिखत)



collegedunia
India's largest Student Review Platform

**20.** क) अधोलिखित वाक्ये एकम् अव्ययम् एकम् उपसर्गं च चित्वा लिखत – **[1 + 1 = 2]**

i) स राजा कदापि क्रोधं न करोति ।

ii) वयम् प्रतिजानीमः ।

ख) 'क्त्वा' प्रत्ययस्य प्रयोगेन वाक्यद्वयं योजयत साधु भोजनं करोति स जलं पियति ।

## खण्ड – ख

## वैकल्पिक – I

## (संस्कृतं – संस्कृतिश्च)

**21.** अधोलिखित काव्यानां तेषां लेखकैः सह मेलनं कृत्वा लिखत – **[2]**

| 'अ' | | 'ब' | |
|---|---|---|---|
| (i) | उत्तरसीता चरितम् | (क) | सत्यव्रतशास्त्री |
| (ii) | जानकीजीवनम् | (ख) | रामभद्राचार्यः |
| (iii) | श्री भार्गवराघवीयम् | (ग) | रेवा प्रसाद द्विवेदी |
| (iv) | शर्नण्यदेशः सुतरां विभाति | (घ) | राजेन्द्र मिश्रः |

**22.** क) अधोलिखित संख्यानां कृते संस्कृत पदानि लिखत – **[2]**

$10^1$, $10^5$, $10^9$, $10^{12}$

ख) गणित ज्योतिर्विज्ञानक्षेत्रे कस्य महत्त्वपूर्णं योगदानम् अस्ति? तस्य ग्रन्थस्य किं नाम? **[2]**

ग) आयुर्वेदविद्यायाः प्रवर्तनं लोके कः कृतवान्? तस्या विद्यायाः कति परंपराः जाताः? **[2]**

घ) प्रासाद निर्माणकला कस्मिन् ग्रन्थे विस्तरेण वर्णिता? **[1]**

**23.** संगणक यन्त्रस्य कार्यक्रमाणां कृते का लिपिः आदर्श लिपिः अस्ति? तस्यां लेखने, मुद्रणे, टंकणे च वर्णाः की दृशानि भवन्ति? **[1 + 1 = 2]**

**24.** क) संस्कारेण किं भवित? भारतीय संस्कृतौ कति संस्काराः भवन्ति? **[2]**

ख) भारतीय संस्कृतेः वर्णनं कुत्र प्रतिबिम्बितम्? **[1]**

ग) अन्नप्राशनं शिशोः जन्मनः कस्मिन् मासे विधीयते? **[1]**



collegedunia
India's largest Student Review Platform

## वैकल्पिक – II

### (प्रयोजनमूलक संस्कृतम्)

**21.** अधोलिखित वाक्येषु रिक्त स्थानानि पूरयत – **[4 × 1 = 4]**

क) संस्कृतभाषाया ............ प्रयोजनानि सन्ति ।

ख) इतिहासस्य धर्मज्ञानस्यच कोशग्रन्थः ............... अस्ति ।

ग) आयुर्वेदस्य चिकित्सा पद्धतिः ............... रोगेषु सफला दृश्यते ।

घ) संस्कृतज्ञाः विविध क्षेत्रेषु ................ दृश्यन्ते ।

**22.** अधोलिखित प्रश्नान् उत्तरत – **[4 × 1 = 4]**

क) आकाशवाणीतः प्रतिदिनंवयं कदा संस्कृतवार्तानां प्रसारणं श्रृणुमः ?

ख) पत्र पत्रिकाणां भाषाशैली श्रव्यभाषायाः कीदृशी भवति ?

ग) पत्रिकायां कीदृश्यः सूक्तयः प्रदीयन्ते ?

घ) बीए. एम. एस. पाठ्यक्रमे कस्य ज्ञानम् अनिवार्यतया अपेक्षते ?

**23.** पत्र पत्रिकायांः प्रकाशनाय किम् अनिवार्यं भवति ? एकस्य साप्ताहिक पत्रस्य नाम लिखत । **[2]**

**24.** क) पत्रिकासु चित्रसंयोजनाय किम् अपेक्ष्यते ? **[1]**

ख) विज्ञापनैः कः लाभः ? **[1]**

ग) बालकानां पत्रिकायै कीदृशी भाषा स्यात् ? **[1]**

घ) त्रुटिशोधने प्रयुक्तेन अधोलिखित चिह्नद्वयेन सह व्याख्या योजनं कुरुत – **[2]**

| | 'अ' | | 'ब' |
|---|---|---|---|
| (i) | (:) | (क) | वर्णयोः शब्दयोः वा अन्तरालम् |
| (ii) | (#) | (ख) | योजक चिह्नम् |

⌘⌘⌘



collegedunia
India's largest Student Review Platform